aspects अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् । आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् SaraRaU. 3. 23.

अंशपञ्चसप्तति (aṁśa-pañcasaptati) *f.* seventy-five degrees षष्ट्यंश-पञ्चसप्ततिमित्यपरतो भृगुर्द्वयः PañcSi. 18. 5.

अंशपति (aṁśa-pati) *m.* the lord of the *navāṁśa* राशिफलं यद् दृष्टं पूर्वैः कथितं ग्रहैः शशाङ्कस्य । तस्य निरोधो दृष्टो यथंशपतिर्बलीभवति Sārā. 24. 23; अंशपतेश्चन्द्रस्य च फलं विनिश्चित्य दर्शनकृतानि । कथितानि…फलानि Sārā. 24. 24; वर्णस्वभावाकृतिलक्षणानि । प्रधानवीर्येऽशपतौ शशीव तत्स्वामिराशिक्रमशो विधत्ते Sārā. 50. 1.

अंशपद (aṁśa-pada) *n.* **A** the final resort or abode of the parts or individual souls (= Viṣṇu) शुद्धे त्वंशपदे चाद्ये तत्त्वानामुदयास्पदे । तत्त्वात् तत्त्वं समायाति(? दाय) तदा चात्मनि योजयेत् JayāS. 16. 297; **B** square-root of the numerator छेदपदेनांशपदं विभजेल्लब्धं भवति मूलम् ĀryaSi. 15. 16 (147)

अंशपर (aṁśa-para) *adj.* [*f.* -ā] **1** associated with the key-note त्रिधा मन्द्रगतिः—अंशपरा, न्यासपरा, अपन्यासपरा (? अपन्यासपरा) NāṭyaŚā. xxviii. 70. 2; **2** referring to *aṁśa* a portion (as a king's share or fee for seeing that a loan is repaid) बन्धशब्दोंऽशपरः BālamBha. ii. 86. 33 (*on* 2. 76)

अंशपरंपरा (aṁśa-paraṁparā) *f.* a series or succession of parts घटसंयोगो हि घटांशसंयोगपूर्वकः, सोऽपि तदंशसंयोगपूर्वकः । न चैवं निरंशे परंपरा विश्राम्यतीति वाच्यम्, अंशपरंपराया अविश्रमस्याप्यङ्गीकृतत्वात् NyāySu.(Ja.) 365A. 13 (*on* ii. 2. 6)

अंशपरिक्षय (aṁśa-parikṣaya) *m.* the end of (the sun's stay in the last) degree (in a particular zodiacal sign in any solar month) (रवेः) अंशपरिक्षयः सौरमासान्तिमदिनम् VīraMi. (Saṁskāra) 320. 17.

अंशपर्याप्त (aṁśa-paryāpta) *adj.* commensurate with the shares (in an inheritance); sufficient for exact divisions or shares अंशपर्याप्तानश्वादीन् विभज्य वेषम्येणावशिष्टमश्वादिकं ज्येष्ठस्यैव दद्यात् Subodhi. 52. 5 (*on* 2. 118)

अंशपूर्व (aṁśa-pūrva) *adj.* beginning with or represented by the number of degrees मासाः पृथक् ते द्विगुणास्त्रिपूर्णबाणाधिकाः स्वाङ्कनृपांशयुक्ताः । त्रिभिर्विभक्ताः फलमंशपूर्वम् GrahaGa. 109. 25 (10. 2); गणमनुहृतिरिन्दुः स्वाद्रिभूभागहीनः । खमनुहृतगणोनो लिप्तिकास्वंशपूर्वः GrahaLā. 1. 10; अङ्कपत्रे…अर्कभुक्तालयभागसंस्थम् । भागादिकं…षड्घ्नेष्टनाडीयुतमंशपूर्वं…लग्नं भवेत् SiddhāTaVi. 172. 13.

अंशप्रकल्पन (aṁśa-prakalpana) *n.* the space-points, the number of atomic units (of the *karman*) अनुभावो विपाकः स्यात् प्रदेशोंऽशप्रकल्पनम् TriṣaŚaPuC. iv. 4. 283.

अंशप्रकल्पना (aṁśa-prakalpanā) *f.* allotment of a share संभूय स्वानि कर्माणि कुर्वद्भिरिह मानवैः । अनेन विधियोगेन कर्तव्यांशप्रकल्पना ManuSm. 8. 211; अंशप्रकल्पना च 'तस्य द्वादशशतं दक्षिणा' इत्येवं क्रतुसंबन्धिमात्रतया विहितायां दक्षिणायामेव SmṛtiCan. iv. 436. 16; प्रधानदक्षिणास्वंशप्रकल्पनायाः प्रकारमाह SmṛtiCan. iv. 437. 14.

अंशप्रकल्पित (aṁśa-prakalpita) *adj.* to whom a share (in the spoils of victory) has been allotted or paid प्रदत्तभृतिका ह्यन्ये भूपा अंशप्रकल्पिताः ŚukrNī. iv. 7. 289.

अंशप्रकार (aṁśa-prakāra) *m.* varieties of aspects, different aspects उपाधयोऽवच्छेदका अंशप्रकाराः SyādVāMañ. 24. 18.

अंशप्रकाश (aṁśa-prakāśa) *m.* manifestation of a part (of greatness) अंशप्रकाशादंशः स्यात् SātvaTa. 3. 25.

अंशप्रतिम (aṁśa-pratima) *adj.* corresponding to the *navāṁśas* होरा त्वंशप्रतिममपरे राशितुल्यं वदन्ति Bṛhajjā. 7. 2 = JātaPā. 5. 7; किं त्वत्र भांशप्रतिमं ददाति…होरा JātaPā. 5. 20.

अंशप्रतिषेध (aṁśa-pratiṣedha) *m.* partial denial or prohibition अंशप्रतिषेधो यथा- कान्तः किं केरविण्याः कलयति…ज्ञातः…त्वं चरित्रैर्विचित्रैः Ekāva. viii. 31. 31.

अंशप्रदान (aṁśa-pradāna) *n.* allotment of a share, giving away a part येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः ।…तस्य भागो न लुप्यते ManuSm. 9. 211 (Medhā. अंशप्रदानं विभागकालः) ; Mitā. 249. 8 (*on* 2. 139) अंशप्रदानतोंऽशप्रदाने । सार्वविभक्तिकस्तसिः । विभागकाल इति यावत्); अंशप्रदानं विभागस्ततो हानिः पारिव्राज्यपातित्यादिनानधिकारः Aparā. 749. 7 (*on* 2. 139); पुरुषाणां ज्येष्ठः कनिष्ठो वा ब्रह्महत्यादिना अंशप्रदानान्निवृत्तः हीयेत वा तस्य भागो न लुप्यते VyavaNi. 473. 13; महापातकिनो नांशप्रदानार्हाः VyavaNi. 473. 12; वदन्ति मुनयः केचित् कृष्यादीनां विशुद्धये । लाभस्यांशप्रदानं च सर्वेषां शुद्धिकृद्भवेत् Br. ParāSm. 5. 189.

अंशप्रमाण (aṁśa-pramāṇa) *adj.* measuring one unit कर्णिका केसरं पत्रसन्धिः पर्वेति च क्रमात् । चत्वार्यंशप्रमाणानि व्यक्तोंऽशो व्योम तद्वहिः LakṣmiT. 37. 15.

अंशप्रवृत्ति (aṁśa-pravṛtti) *f.* activity of a part or portion अंशप्रवृत्त्यनुपपत्त्यांशकार्यसिद्धयर्थं प्रवृत्तेऽशिनि ब्रह्मणि जीवशब्दप्रवृत्तिर्मुख्यैव VedāntKau. 282. 3 (*on* iii. 2. 14)

अंशप्रास (aṁśa-prāsa) *m.* name of a throw in the game of dice अंशप्रासोंऽशस्य भागधेयम् MaiS. i. 6. 12.

अंशफल (aṁśa-phala) *n.* the effect of a particular *navāṁśa* occupied by the moon वीर्यान्वितोंऽशकपतिर्निरुणद्धि पूर्वं राशीक्षणस्य फलमंशफलं ददाति Bṛhajjā. 19. 9.

अंशबाहुल्य (aṁśa-bāhulya) *n.* multiplicity or manifoldness of the constituent parts न च वक्तव्यमणोरप्यात्मनोंऽशबाहुल्याद् बहुरूपत्वमिति TattvPrakā. 118A. 1 (*on* ii. 3. 27)

अंशभाक्त्व (aṁśabhāk-tva) *n.* entitlement to a share (in a property or inheritance) यथौरसे सति पुत्रिकाया अंशभाक्त्वं तथान्येषामपि पुत्राणामंशभाक्त्वमस्ति Subodhi. 58. 22 (*on* 2. 132); गुरुः श्वशुरादिः । तदिच्छायामंशभाक्त्वम् VyavaMa. 140. 3; BālamBha. ii. 174. 20 (*on* 2. 132)

अंशभाक्त्वनिषेध (aṁśabhāktva-niṣedha) *m.* denial of entitlement to a share in a property, disinheritance असमानजातीयस्यांशभाक्त्वनिषेधेन पुत्रत्वानुत्प(? पप)त्तिं गमयति VīraMi. (Saṁskāra.) 210. 24.

अंशभाग (aṁśa-bhāga) *m.* a part or portion, a part and parcel of a thing (*aṁśaḥ eva bhāgaḥ*) अंशभागैर्भवद्भिस्तु रक्ष्योऽयं नाट्यमण्डपः NāṭyaŚā. 1. 83 (Abhinava appears to explain it as *aṁśas* of the theater and the suitable groups of gods to protect them); अथाहमंशभागेन देवक्याः पुत्रतां शुभे । प्राप्स्यामि BhāgP. x. 2. 9; भगवानपि…आविवेशांशभागेन मन आनकदुन्दुभेः BhāgP. x. 2. 16; स भवान् सर्वलोकस्य भवाय…। अवतीर्णोंऽशभागेन सांप्रतम् BhāgP. x. 10. 35; अत्र स्थाने महादेव स्थीयतामंशभागतः ।…उपकाराय लोकानाम् SkandP. V. iii. 72. 38; त्वया सृष्टमिदं विश्वं यदेतत् सचराचरम् । तस्मिन्नेवांशभागेनान(? नु) प्रविश्यावभाससे ĀdiP. 29. 34.

अंशभागित्व (aṁśabhāgi-tva) *n.* **A** entitlement to a share (in a property or inheritance or profit) cf. **अंशभाक्त्व** ; न हि स्त्रीणां दायानर्हत्वे मात्रादीनां दुहित्रन्तानामंशभागित्वोक्तिर्युज्यते SmṛtiCan. iv. 623. 14; अंशभागित्वं तुल्यम् इत्येवार्थः न त्वंशस्य तुल्यत्वमपि VīraMi. 584. 11 (*on* 2. 121); अंशभागित्वप्रसङ्गेन राज्ञोंऽशभागित्वमाह VīraMi. 714. 15 (*on* 2. 261); दत्तकादिपुत्रविषयमेवैतत्, अंशभागित्वप्रदर्शनात् VīraMi. (Saṁskāra.) 689. 20; अभ्युपगमेऽपि वा पत्न्यादिष्वगणनेनांशभागित्वासंभवात् VīraMi. (Saṁskāra.) 689. 19; सापत्नमातुरपि अंशभागित्वमिति सिद्धम् BālamBha. ii. 156. 10 (*on* 2. 123); कानीनादयंशे तेन तेषां सामान्येनांशभागित्वाभावस्योक्तत्वात् BālamBha. ii. 175. 6 (*on* 2. 132); **B** entitlement to a share (in the offerings in a religious rite) यत्तुनस्तत्रैवोक्तम् केचिदिच्छन्ति नारीणां पृथक्श्राद्धं महर्षय इति, तत् यत्र नारीणां पितामह्यादिभिः सह सपिण्डीकरणं कृतं, तद्विषयम्, तत्र पितृपिण्डेष्वंशभागित्वाभावात् SmṛtiCan. v. 99. 11; शातातपेन पतिश्राद्धे पत्न्या अंशभागित्वमुक्तम् CaturCin. III. i. 95. 1.

अंशभागिन् (aṁśa-bhāgin) *adj.* [*f.*-nī] **A** taking or playing a part in, participating in, participant. कार्यं तवैव तत् । श्रेयसामुपदेशात् तु वयमत्रांशभागिनः KumāSaṁ. 6. 74; पूजाहेतोः प्रयच्छन्ति ये केचित् द्रव्यमात्मनः । पूजासु क्रियमाणासु ते भवन्त्यंशभागिनः ParaS. 5. 71; **B** one entitled to a share in a property, co-heir, heir मातापि पितरि मृते पुत्रतुल्यांशभागिनी KātySm. 851 (103. 5); अनेन दुहितरोऽपि पितुरूर्ध्वमंशभागिन्य इति गम्यते Mitā. 229. 22 (*on* 2. 124); नैकोऽयं राज्यभागी स्याद् वयमप्यंशभागिनः KathāKau. 9. 49.

अंशभाज् (aṁśa-bhāj) *adj.* [P. iii. 2. 62, SiddhāKau. 497A. 16] **A** sharing in (misery, merits, demerits etc.), partner यस्याविभक्तं वसु राजन् सहायैस्तस्य दुःखेऽप्यंशभाजः सहायाः MahāBhā. iii. 6. 20; यं चैव धर्मं कुरुते तस्य पुण्यफलं च यत् । सर्वस्यैवांशभाग् दाता MahāBhā. xiii. 68. 16; (अप्सु) निरुद्धासु (तर्पणादि) न कुर्वीरन्नंशभाक् तत्र सेतुकृत् BaudhDS. ii. 3. 5; चलतश्चैतान् स्वधर्मे स्थापयेत्, धर्मस्य ह्यंशभाग्भवतीति GautDS. ii. 2. 11; रक्षणात् तासां तद्धर्मस्यांशभाङ् नृपः NītiSā. 2. 10; **B** a co-heir, co-parcener पितृद्रव्यादविभक्तोपगतानां पुत्राः पौत्रा वा आ चतुर्थादित्यंशभाजः ArthaŚā ii. 31. 5 (3. 5); **C** sprung from or born of a part (of a divinity) त्वं हि मत्प्रभवो राजन् विदुरश्च ममांशभाक् MahāBhā. iii. 298. 21.

अंशभारिक (aṁśabhār-ika) *adj.* carrying a load partly (i. e. in association with another) काचिद्दौक्षीद् गृहीत्वाम्बु भस्त्रिकादंशभारिकात् । सखीं श्रान्ताम् DvyāśraKā. 17. 14 (comm. अंशो भागभूतो भारो जलभारोंऽशभारः तेन हरति अंशभारिकः । तस्माद् द्वितीयेन सहाम्बुभारं वहत इत्यर्थः)